This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१० ॥श्रीगणेशाय नमः॥ विषयता च स्वरूपसंबंधविशेषो ज्ञानादीनां विषये न त्वतिरिक्ता मानाभावादिति प्राचः॥ तदसत्॥
तथाहि॥ विषयताया ज्ञानस्वरूपत्वे घटवद्भूतलमित्यादिज्ञाननिरूपितानां घटभूतलादिवृत्तिविषयतानामभेद॥
पत्त्या तादृशज्ञानानंतरं घटप्रकारकभूतलविशेष्यकज्ञानवानहमित्यादिप्रतीतिवत् भूतलप्रकारकज्ञानवानहमिति
प्रत्ययप्रसंगः॥ घटनिष्ठप्रकारताख्यज्ञानरूपविषयताया एव भूतलवृत्तित्वात्॥ एवं घटपटावित्यादिसमू
प हालंबनधियोऽप्रमत्वं तत्र पटनिष्ठतज्ज्ञानरूपविशेष्यताया घटत्वप्रकारतानिरूपितत्वज्ञानरूपविशेष्यताभि
न्नतया तादृशज्ञानस्य घटत्वप्रकारतानिरूपितपटनिष्ठविशेष्यताशालित्वात्॥ विषयस्वरूपत्वे च घटभूतलसंयो
गाद्यवगाहि(?)कारकसमूहालंबनीयघटनिष्ठविषयितानां घटवद्भूतलमित्यादिविशिष्टनिरूपितघटादिनिष्ठविषयतानां
च तत्स्वरूपत्वेनाविलक्षणतया समूहालंबनविशिष्टबुद्ध्योर्वैलक्षण्यानुपपत्तेः॥ न च विशिष्टज्ञाने संबंधसंबंधो
रेव न संभवात्॥ तस्माज्ज्ञानविषयाभ्यामतिरिक्तमेव विषयत्वमनन्यगत्या स्वीकरणीयं॥ तच्चाश्रयतया विषयेण
न नेन निरूपकत्वेनवर्त्तत इति एतैर्विषयित्वमपि व्याख्यातं॥ न च विषयप्रतियोगित्वमेवास्तु(?)पितमस्त्विति तस्या
तिरिक्तत्वस्वीकारणीय इति वाच्यं॥ विषयित्वमेवातिरिक्तं॥ तत्प्रतियोगित्वं विषयत्वमस्त्वस्यापि वक्तुं शक्यत्वात्॥
मधिकोभासते। ननु समूहालंबने स्पलादेव वैलक्षण्यमुभयत्र तरानिताबो। संबंधसंबंधमादाय पितमूहा॥ निरूपलत्वं

Accession No:- ~~831~~ M 817

Title :- विषयता विचार.

Subject :- न्याय.

Author :- गदाधर.

Date :- ?

पत्रे :- 7

Checked 2012

K.K.S.U. LIBRARY RAMTEK 441 106 M-817 Dist Nagpur

१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तस्माद्विनिगमनाविरहादुभयमेवेति दिक्। विषयतादिकं तु विषयभेदेन भिद्यते। अन्यथा घटवद्भूतलमित्यादिज्ञानीय
घटभूतलादिविषयतानां घटपटाविमावित्यादिज्ञानीय घटपटादिविषयतानां प्रसंगेन सर्वोक्तानुपपत्तिस्तादवस्थ्यात्। ननु ८
ज्ञानेप्यक्तिभेदापत्तेः॥ मानाभावात्॥ तच्च द्विविधं विषयत्वं निरूपितं तन्निरूपितं च। तत्रानिर्विकल्पकनिरूपितविष
यता विषयत्वानिरूपिता। निर्विकल्पकीयघटत्वादिविषयतायाः घटादिविषयतानिरूपितत्वे मानाभावात्। विशिष्टबुद्धिविषयता
संसर्गता चविषयत्वांतर[redacted] निरूपिता प्रकारता विशेष्यतारूपायांस्तासां परस्परं निरूप्यनिरूपकभावसत्वात्। अथांसे घटवद्भूतलं पर्वतो वह्निमा
निसाकारकज्ञानविषयत्वात्। घटवान्पर्वतो वह्निमद्भूतलं इत्याकारकज्ञानविषयतायां वैलक्षण्यप्रसंगात्। मन्मते प्रथमे घटत्वप्रका न्य५
रत्व भूतलविशेष्यत्वयोर्वह्निप्रकारत्व पर्वतविशेष्यत्वयोश्च परस्परं निरूप्यनिरूपकभावः। द्वितीये च वह्निप्रकारत्वभूतलविशेष्यत्व
योर्घटप्रकारत्वपर्वतविशेष्यत्वयोरिति वैलक्षण्योपपत्तिः। एवं घटवद्भूतलं घटवान्पर्वत इत्याकारकसमूहालंबने घटादिरूपैकप्रका
रनिष्ठप्रकारतायामपि भूतलपर्वतादिविशेष्यभेदेन घटवद्भूतलं पटवद्भूतलमित्यादिसमूहालंबने च भूतलैकनिष्ठविशेष्यतापि घटप
टादिभेदेन भेदो बोध्यः। उभयविशेष्यतानिरूपितत्वस्यैकप्रकारतायां उभयप्रकारतानिरूपितत्वस्यैकविशेष्यतायां स्वीकारे तादृशसमू या
हालंबनापत्तिरिक्तविषयताकल्पनप्रसंगात्। मन्मते घटवद्भूतलमित्याद्याकारकप्रत्येकज्ञानीयनिरूपितप्रत्येकविशेष्यतानिरू
पितप्रकारतासत्वेकं प्रकारतानिरूपितविशेष्यताभ्यामेवोपपत्तेः। समूहालंबने प्रकारताभेदेन विशेष्यताभेदे घटवद्भूतलं पट ॥

वदिति समूहालंबनादेकत्र द्वयमिति रीत्या एकधर्मिणि नानावैशिष्ट्यावगाहि घटवद्भूतलं पटवदिति आकारकज्ञानस्यापि वैलक्षण्य
प्रसंगः। मम तु समूहालंबने प्रकारताभेदेन विशेष्यताभेदो न चैकत्र द्वयमिति रीत्या तादृशबोधे इति समूहालंबनतस्तस्य वैलक्ष
ण्योपपत्तिरिति॥ विशेष्यत्वं प्रकारत्वं च द्विविधं। किंचिद्धर्मावच्छिन्नं निरवच्छिन्नं तत्र किंचिद्धर्मावच्छिन्नं विशेष्यता भूतलत्वावच्छेदकविशे खिन्न
षणाविशिष्टघटादिरूपापरधर्मवैशिष्ट्यावगाहिज्ञाने तत्र घटादिप्रकारतानिरूपितभूतलादिविशेष्यतायाः भूतलत्वा
वच्छिन्नत्वात्। अन्यथा केवलमेकत्र द्वयमिति रीत्या उभयवैशिष्ट्यावगाहिनो भूतलं घटवदिति ज्ञानात्तस्य वैलक्षण्यानुपपत्तेः।
किंचिद्धर्मावच्छिन्नप्रकारता च विशिष्टनिरूपितवैशिष्ट्यावगाहि घटवदित्याकारकज्ञाने॥ तत्र घटादिप्रकारताया घटत्वा
वच्छिन्नत्वात्। अन्यथा केवलविशिष्टविशेषणे तत्रापि विशेषणीतरमीत्येवरीत्या घटपटस्याद्यवगाहिनस्तथाविधज्ञान
द्विशिष्टवैशिष्ट्यबोधस्य वैलक्षण्यानुपपत्तिः प्रपंचितं चेदमधिकमन्यत्र। तदंशे विशेषणतापन्नमे[...]वतन्निष्ठविषय
तावच्छेदकमिति तु बोध्यं॥ तद्धर्मावच्छिन्नविषयता चैनतद्धर्मप्रकारतानिरूपिता। तस्यास्तत्पर्वे मानाभावात्। न चैवं भूतलं घट
दि वदित्यादिज्ञानानां भूतलत्वादिप्रकारतानिरूपितविशेष्यताशालित्वानुपपत्तिरिति वाच्यं। केवलमेकत्र द्वयमिति रीत्या भूत
लत्वघटवैशिष्ट्यावगाहिज्ञानीयभूतलत्वावच्छिन्नतद्भूतलत्वादिप्रकारतानिरूपितविशेष्यतानियामकसामग्र्या
तादृशविशिष्ट[...]वैशिष्ट्यकाले सत्वात्तस्य तादृशविषयताशालि तस्यावश्यकत्वात्तन्न एवं तथात्वोपपत्तेः। वस्तुतस्तु विशि
ष्टवैशिष्ट्यबोधविचारे निरवच्छिन्नविषयतादीनामखिलविशिष्टवैशिष्ट्यबोधसाधारण्यस्य स्वं दुर्वचत्वात्। तादृशविशेष्य
भूतलं घटवत् अत्र पूर्वं [...] अवच्छेदकं न

2

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२॥ ताभ्रून्यबोधस्य भ्नतत्त्वाद्विप्रकारतानिरूपितविशेष्यताशालिबोपपत्तियेभ्नतत्साध्यवच्छिन्नविशेषणयाएवंतत्प्रकारता ता
निरूपितत्वैस्वीकरणीयं अथैवंतादृशज्ञानस्याभ्नतत्त्वप्रकारकतानिरूपितभ्नतत्साध्यवच्छिन्नविशेष्यताशालित्वान्नतत्ता
दिविशिष्टेभ्नतत्त्वादिवैशिष्ट्यावगाहिनोभ्नतत्त्वेभ्नतत्त्वमित्याकारकज्ञानस्याभ्नतत्त्वे घटवद्भिन्नत्याकारकज्ञानस्यवैलक्षण्या
नुपपत्तस्तादृशज्ञानानेतरेभ्नतत्त्वविशेष्येभ्नतत्त्ववैशिष्ट्यावगाहित्वस्मरणापत्तिरिति चेन्न घटवद्भूतलमित्याधाकारक हि
ज्ञानीयभ्नतत्त्वविशेष्यतायाभ्नतत्त्वप्रकारतानिरूप्यत्वेपितस्याभ्नतत्त्वत्वावच्छिन्नत्वावच्छिन्नविशेष्यतात्वेननतन्निरूपत्वे
किंतुभ्नतत्त्वविशेष्यतात्वेनभ्नतत्त्वेभ्नतत्त्वेमिस्याद्दौ चभ्नतत्त्वावच्छिन्नत्वविशिष्टविशेष्यतात्वेनैवभ्नतत्त्वप्रकारतानिरूपितत्वाभि शे
त्यभ्युपगमेन तद्वैलक्षण्योपपत्तेः। अवच्छेदकत्वमपि द्विविधं अवच्छिन्नंनिरवच्छिन्नं च। तत्रावच्छिन्नमवच्छेदकवैज्ञातिमद्द्रव्यवदि
त्यादौ। तत्रभ्नतत्त्वविशेष्यतावच्छेदकतायाज्ञातिमत्त्वावच्छिन्नत्वात्। भ्नतत्त्वे घटवदित्यादौ चभ्नतत्त्वत्वादिनिष्ठविशेष्यताव
च्छेदकत्वादिकं निरवच्छिन्नमिति। एवमवच्छेदकतानिरूपितावच्छेदकत्वादिकमपि व्याख्यातं। अवच्छेदकतावच्छेदकं तु
अवच्छेदकांशे विशेषणतापन्नमेवेति बोध्यं विषयतावच्छेदकादिभेदेनानानुगतानां तासामनुगमकं विषयतात्वमव्य ल
तिरिक्तमास्थेयं। अन्यथा घटोज्ञानविषयः पटोज्ञानविषयः इत्याकारकानुगतप्रतीतेरनुपपत्तेः। घटत्वादिविशिष्टबु
द्धित्वावच्छिन्नं प्रति घटत्वादिविषयकज्ञानत्वादिना हेतुत्वानुपपत्तेः। घटत्वाद्येकैकविषयतानामेवप्रकारतादिविशेष्य
तादिभेदेननानाविधतयाकारणतावच्छेदकाननुगमेनव्यभिचारप्रसंगात्। एवं विषयतात्वे दंतरावच्छेदकत्वप्रकारत्वे य ॥२॥

ता तं

द्रव्यंचद्रव्यवद्भूतलं ५ नेत

त्वविशेष्यत्वाद्यननुगतप्रतीतिबलात् अतिरिक्तमुपगंतव्यं। अतएवपर्वतत्वावच्छिन्नविशेष्यताकवन्ह्यनुमितित्वावच्छिन्नं प्रतिपर्वतत्वावच्छिन्नविशेष्यता
निरूपितवन्हिव्याप्यधूमादिप्रकारताशालिज्ञानत्वादिना अनुगतहेतुत्वकल्पनमुपपद्यते। अन्यथा तत्तद्धर्मादिभेदभिन्नानां प्रकारतादीनामननुगमेनैतदन न
पपत्तेः। प्रकारत्वं[redacted]विशिष्यतात्वादिकं तु न मिथो विरुद्धं। घटवद्भूतलमित्यादिज्ञाने घटत्वादिप्रकारतानिरूपितघटादिनिष्ठविशेष्यताया एवं भूत
लादिनिष्ठविशेष्यतानिरूपितप्रकारतायाश्च सत्त्वात् तत्र विशेष्यतात्वप्रकारत्वयोः समावेशात्। तत्र तादृशप्रकारतादिविशेष्यतयोर्भेदे घ
टवद्भूतलं घटश्चेति ज्ञानयोर्वैलक्षण्यानुपपत्तेः। उभयत्रैव घटत्वप्रकारताया द्रव्यत्वप्रकारतानिरूपिताया अपि विशेष्यताया घटप्रकारतानि
रूपितभूतलत्वविशेष्यतायाश्च सत्त्वात्। मन्मते प्रथमे घटत्वप्रकारतानिरूपितघटनिष्ठविशेष्यताभूतलनिष्ठविशेष्यतानिरूपितप्रकारत्वा
भिन्ना द्रव्यत्वप्रकारतानिरूपितविशेष्यतायास्तद्भिन्नाद्वितीये द्रव्यत्वप्रकारतानिरूपितघटनिष्ठविशेष्यताभूतलविशेष्यतानिरूपितप्र
ता कारत्वाभिन्नाघटत्वप्रकारतानिरूपितविशेष्यत्वं च तद्भिन्नाइति वैलक्षण्योपपत्तिः। एवं रक्तदंडवान् पुरुष इति ज्ञाने रक्तत्वप्रकारतानिरूपि
तदंडत्वावच्छिन्नविशेष्यता एव पुरुषनिष्ठविशेष्यतानिरूपितप्रकारतारूपा न तु दंडेरक्तोदंडो दंडवान्पुरुष इत्यादिसमूहालंबनाद्वा
शिष्ट्यबुद्धेर्वैलक्षण्यानुपपत्तेः उभयत्रैव रक्तत्वप्रकारतानिरूपितदंडविशेष्यताया दंडप्रकारतानिरूपितपुरुषविशेष्यतायाश्च
सत्वात्। केचित्तु। विशेष्यताप्रकारतादुद्देश्यत्वविधेयत्वेपि विषयताविशेषौ नौ किंतु धर्मावच्छिन्नविशेष्यत्वमेवोद्देश्यत्वं तादृश वि
मेवविधे विशेष्यतानिरूपितप्रकारत्वं मस्तु किंतयोरतिरिक्तत्वस्वीकारेगौरवमिति वाच्यं। तथा सति वन्हिमान्पर्वतो घटवान्नित्यादिबोधस्यापि
यरु२ पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितवन्ह्यादिविधेयताशालित्वात् पर्वतो वन्हिमानित्याकारकानुमित्यनंतरमिव तादृशानुमित्य

य

3

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३॥ नंतरमपि वर्षते वह्निमनुमीत्याकारकानुव्यवसायापत्तेः। मन्मते तादृशज्ञानव्यावृत्त्याः पर्वतादिविशेष्यतानिरूपितप्रकारविलक्षणा
६ याः पर्वतो निष्ठेश्चयाता निरूपितवह्न्यादिविधेयतायाएव तादृशानुव्यवसायविषयत्वाभ्युपगमादेव तादृशानुव्यवसायाप
त्यसंभवात्। अथ पर्वतविशेष्यकवह्निप्रकारकानुमितत्वमेव तादृशानुव्यवसायविषयः। विषयतासंबंधेन तादृशानुव्यवसायप्रति
पर्वतविशेष्यवह्निव्याप्यवत्ताज्ञानजन्यानुमितित्वेन तादात्म्यप्रत्यासत्त्या हेतुत्वोपगमेन वह्निमान्पर्वतो घटवानित्याकारकानु
मितित्यनंतरं न तथाविधानुव्यवसायापत्तिरिति किमतिरिक्तविधेयतयेति चेन्न तादृशगुरुधर्मावच्छिन्नस्य तादृशहेतुत्वे कल्प
ना केल्पया पर्वतविशेष्यतानिरूपितवह्निविधेयतावदनुमितित्वेन तद्धेतुत्वकल्पने लाघवादिति दिक् विधेयतासेत्स्यती
ति वाच्यं लाघवमात्रेणातिरिक्तविषयतासिद्धौ धूमपरामर्शादिजन्यतावच्छेदकतयापि विलक्षणविषयतासिद्धिप्रसंगात्।
कुत्र विषयतायास्तज्जन्यतावच्छेदकत्वे तस्याः लौकिकानुमितिसाधारणतया तद्व्यभिचारवारणाय वह्नित्वोत्तरत्वस्य
कोर्यतावच्छेदककोले प्रवेशेऽनतिगौरवं। अयातिरिक्तविधेयताभ्युपगमेपि सिद्ध्यभावजन्यतावच्छेदकं दुर्वचं तथाहि।
पर्वतो वह्निमानित्यादिसिद्ध्यभावस्य जन्यतावच्छेदकं न पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निप्रकारानुमितित्वं वह्निमन्य
वैतो घटवांश्चेत्याकारकानुमितौ व्यभिचारात्। नापि पर्वतत्वावच्छिन्नविशेष्यताकवह्निव्याप्यवत्ताज्ञानजन्यानुमितित्वं
वह्निव्याप्यधूमवान्पर्वतो वह्निव्याप्यवांश्चेत्याकारकसमूहालंबन[illegible]जन्यायां तथाविधानुमितौ व्यभिचारादिति चेन्न।
वह्नित्वान्यधर्मावच्छिन्नप्रकारत्वानिरूपितपर्वतत्वावच्छिन्नविशेष्यकानुमितित्वस्यैव पर्वतो वह्निमानस्येता
॥३॥

व्य तत्या

दृशासिद्ध्यभावजन्यतावच्छेदकत्वस्वीकारात्। वह्निमान्पर्वतो घटवानित्याद्याकारानुमितिविशेष्यतायां वह्न्यान्यघटत्वाद्यवच्छिन्न
प्रकारतानिरूपितत्वेनैव व्यभिचारानवकाशात्। न चैवमपि वह्निमत्पर्वतवान्देशइत्याद्याकारानुमितौ व्यभिचा[illegible]रस्तादृशानुमितिविशे
ष्यतायां वह्नित्वान्यधर्मावच्छिन्नप्रकारत्वानिरूपितत्वादिति वाच्यं। तादृशानुमितिविशेष्यतायाएव निवेशनीयत्वात्। न चैतदपेक्षया पर्व
छिन्न× तत्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नविधेयतादृशासिद्ध्यभावजन्यतावच्छेदकत्वे लाघवात्तत्सिद्धिरिति वाच्यं। लाघवेनातिरिक्तविष
यतासिद्धेः प्रागेव निरस्तत्वादिति चेन्नैवं। अतिरिक्तविधेयतानभ्युपगमे वह्निं नानुमिनोमीति प्रतीतेरनुमितिनिष्ठो वह्निप्रका
रत्वाभावात्मनिष्ठवह्निप्रकारकानुमितित्वावच्छिन्नाभावो वा विषयो वाच्यः। तथापि वह्निमान्पर्वतो घटवान्वह्निमत्पर्वतवा
वान्देशइत्याद्यनुमितिकाले तथाप्रतीत्यनुदयप्रसंगः। तादृशानुमितौ वह्निप्रकारत्वाभावस्य आत्मनि च तथाविधानुमितित्वाव
वच्छिन्नाभावस्यासत्वात्। मम तु वह्निविधेयकत्वाभावस्यानुमितौ वह्निविधेयकानुमितित्वावच्छिन्नाभावस्यात्मनि तादृशप्रती
तिविषयत्वोपगमान्नानुपपत्तिः। न चेदानीं भ्रमरूपैव प्रतीतिरुत्पद्यते। तत्र च विषयासत्वमकिंचित्करमिति वाच्यं। यथा कथं
चित्प्रमात्वस्य कथोपपादनेन प्रतीतेर्भ्रमत्वकल्पनायाऽन्याय्यत्वात्। न च वह्निव्याप्यवत्ताज्ञानजन्यानुमितित्वावच्छिन्नाभाव
त्ति स्यैव तद्विषयोपगमात्तादृशानुमितेश्चातथात्वादतिरिक्तविधेयतानभ्युपगमेपि न तथाविधप्रत्ययानुपपत्तिरिति वाच्यं। तथा सत्य
पि पर्वतो वह्निसमूहालंबनजन्यतथाविधानुमित्यनंतरं मयि तथाविधाप्रतीत्यनुपपत्तिः स्यादवस्था। अनुमितिपरामर्शयोः कार्य

४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वता

॥४॥ कारणाभावग्रहदशायामपि तादृशप्रत्ययस्य सर्वानुभवसिद्धत्वात्तादृशाभावस्य तद्विषयसंभवाच्च। अथैवं विधेयत्वमेवातिरिक्तमास्तां
तु मुद्देश्यत्वं विशेष्यत्वमेवास्तु। किंच विधेयतावद्विधेयताद्वयमपि अतिरिक्तमवश्यं स्वीकरणीयं। अन्यथा विधेयतानां तत्तद्विषया
दिभेदेनाभिन्नतया [redacted] ननु मम मान्तद्धूटितोपदर्शित धर्मावच्छिन्नप्रतियोगिताकाभाव[redacted]स्यैकस्यासंभवात्
ता तद्भानकूटस्य दुर्ज्ञेयतया तादृशप्रतीत्यनुपपत्तिरेव स्यादिति। तथा चातिरिक्तविधेयत्वादिकल्पने मैथिकं पर्वतो वह्निमानित्या न४
द्याकारक[?] प्रत्यक्षादिसाधारणवस्त्वादिप्रकारतायां विधेयतात्वस्वीकारेणैव योपपत्तिः। न च तादृशप्रत्यक्षसाधारणवह्न्या
दिप्रकारतातो वह्निमान् पर्वतो घटवानित्यादिज्ञानीयप्रकारतायां भेदमानाभावात् अविधेयतास्वीकारे तथानुमितिदशायां
नोमी वह्निमानुमिस्यनुव्यवसायानुपपत्तिस्तदवस्थैव वह्निमान् पर्वतो घटवानित्यादिज्ञानीयवह्निप्रकारतायां घटादिप्रकारता
निरूपितपर्वतत्वावच्छिन्नविशेष्यतानिरूपितया पर्वतो वह्निमानित्याकारकज्ञानीयवह्न्यादिप्रकारतायाश्च तथात्वेन तयोर्भेदस्यावश्यकत्वादि
ति वेन्न। प्रकारत्वाद्यतिरिक्तविधेयत्वादीनामनभ्युपगमे न पर्वते वह्निरित्यादिवाक्यजशाब्दबोधस्यैव ह्यादिविधेयकत्वपर्वतोद्देश्यक
त्वानुपपत्तिरिति तिरिक्तविधेयकत्वकल्पनमावश्यकमेव। न च तत्र नास्त्येव पर्वतवह्न्योरुद्देश्यविधेयभावः। किंतु विशेषणविशेष्यभा
वापन्नयोर्वह्निपर्वतयोर्निरूपितत्वयोरेवेति वाच्यं। शाब्दबोधस्थले प्राङ्निर्दिष्टपदार्थस्यैवोद्देश्यतया चरमनिर्दिष्टपदार्थस्यैव विधेयतया
तादृशवाक्यजन्यशाब्दबोधे वह्निपर्वतयोर्निरूप्यनिरूपकत्वयोरुद्देश्यविधेयभावासंभवात्। अन्यथा वह्निः पर्वते पर्वते वह्निरित्यादिजन्यशाब्द
बोधयोर्विशेषणविशेष्यभावावैलक्षण्येन वैलक्षण्यानुपपत्तेः। अत एव गुणानां गुणत्वमित्यत्र( [redacted] )

॥४॥

([redacted]) गुणत्वस्यैवोद्देश्यतावच्छेदकत्वेन तस्यैव विधेयत्वमित्यभिप्रायेणोपायकता उद्देश्यतावच्छेदकवि
धेययोरैक्येन शाब्दबोधानुपपत्तिराशंकिता। यदि च विशेषणविशेष्यभावापन्नयोरेवोद्देश्यविधेयभावः तदा तत्र गुणत्वस्य विषयता
वच्छेदकतया गुणवृत्तित्वस्य विशेषणतया गुणत्वस्य तथात्वेन तदसंगतासंगतमेव स्यादिति। एवं विधेयत्वादीनां प्रकारताविशेषादिरूपत्वे इ
तरव्यापकीभूताभावप्रतियोगि पृथिवीत्ववती पृथिवी साध्यादिपरामर्शजन्यायाः पृथिव्यामितरभेद इत्या[redacted]कारकसाध्यविशेष्यकानुमि
तेस्तद्विधेयकत्वानुपपत्त्या तदुत्तरं इतरभेदे हेतुमिनोमि इत्याद्यनुव्यवसाय[?]पत्तिः। न च तादृशज्ञानीयेतरभेदविशेष्यतायामेव विधेयता
त्वोपगमात्तादृशानुमितेरितरभेदादिविधेयकत्वोपपत्तिरिति वाच्यं। तथा सति पृथिवी व्यापकवान् इतरभेद इत्याकारकपरामर्शज इत्या
न्यायाश्राधेयतासंबंधेन पृथिव्यादिसाध्यकतथाविधानुमितेरपीतरभेदादिविधेयकत्वोपपत्तेः। तथाविधानुमितेर्विशेष्यतावैलक्षण्या
भावादिति। अथ पर्वतो वह्निरित्यादिशाब्दबोधे पृथिव्या[?]मितरभेद इत्याद्यनुमितावतिरिक्तविधेयत्वादिसिद्धावपि पर्वतो वह्निमान्पृ
थिवीतरभेदवतीत्याकारकानुमित्यादौ प्रकारताघतिरिक्तविधेयत्वादौ मानाभावः। वह्न्यादिविषयैकप्रकारत्वादिनिरूपणीभूतानुमित्या
क्लिष्ट दिव्यतिरिक्तविषयतासंबंधकल्पनापेक्षया तादृशप्रकारतादौ विधेयतात्वादिकल्पनाया एव विनिगमकत्वादिति चेन्न। प्रत्यक्षादिसाधारणप्र
द कारतायां विधेयत्वांगीकारेऽनुमित्यादिस्थले बाधबुद्ध्यादीनां प्रतिबंधकतायां प्रसक्तेः व्यभिचारवारणाय प्रत्यक्षान्यत्वस्य
प्रतिबध्यतावच्छेदककोटौ निवेशनीयतया गौरवप्रसंगात्। मन्मते तु विधेयतामात्रवृत्तादृशप्रतिबध्यतावच्छेदककोटौ निवेशानी

५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥५॥ यत यात स्याश्चप्रत्यक्षसाधारण्यानभ्युपगमेनाहार्यप्रसङ्गे व्यभिचारविरहेण प्रसङ्गान्यत्वस्यानिवेशात्। न च परोक्षत्वज्ञाने प्रतिबध्यता
वच्छेदकत्वोपगमेनाहार्यप्रसङ्गे व्यभिचारासंभवेन मम प्रत्यक्षान्यत्वं निवेश्यत इति वाच्यं। परोक्षत्वजातेरन्यत्रदूषितत्वात्। अथ लाघवे
नातिरिक्तविषयतासिद्धेः प्रागेव निरस्तत्वात्। न च कथमेतादृशानुमित्या तादृशानुमितिसाधारणातिरिक्तविधेयतासिद्धिरिति वाच्यम्। एतादृशानुमित्या
तादृशविषयतानकल्प्यते किंतु पर्वते वह्निः पृथिव्यामितरभेद इत्याकारकज्ञानादनुमित्यादौ पूर्वोक्तयुक्त्या सिद्धस्य विषयताविशेषस्य प
र्वतो वह्निमान्पृथिवीतरभेदवती साध्याकारकानुमितिः स्यादेवेत्याश्लाघवेन संबंधकल्पनमिति न क्षाप्यनुपपत्तिरिति। अथ पृथिव्यामितरभेदः पृथ्वि
वीइतर भेदवती साक्षात्कारकानुमितौ रेक विधेयतास्वीकारे साध्यविशेष्यकानुमितौ साध्यप्रसिद्धेः प्रतिबध्यतावच्छेदकत्वं तु दुर्वचं। तथाहि। इतरभेद
[redacted]ज्ञानस्य प्रतिबध्यतावच्छेदकं यदि इतरभेदविशेष्यकानुमितित्वं तदा इतरभेदः पृथिवीव्याप्यवानित्यादिपरामर्शजन्येतरभेदप्रकारको
नुमितौ व्यभिचारः। इतरभेदविधेयकत्वे तु तदितरविशेष्यकानुमितित्वस्य प्रतिबध्यतावच्छेदकत्वेपि पृथिवीतरभेदव्याप्यवतीतरभेदः पृ
थिवीव्याप्यवान् इत्याकारकसमूहालंबनजन्यायाः पृथिवीतरभेदवती पृथिव्यामितरभेद इत्येतादृशसमूहालंबनानुमितौ व्यभिचा
रः। तादृशानुमितेरितरभेदविधेयकत्वाद्विशेष्यकत्वाच्च। मम मते तु प्रकारताभिन्नेतरभेदविधेयकत्वेनेतरभेदज्ञानप्रतिबध्यतावच्छेदके
तिन व्यभिचारः तादृशसमूहालंबनानुमितिनिरूपितेतरभेदविधेयतायाः प्रकारतारूपतया तदन्यत्वाभावादिति चेन्न। इतरभेदविशेष्यक—
॥५॥

म

परामर्शजन्येतरभेदविशेष्यकानुमितित्वस्यैवैन्मतेतदितरभेदज्ञानप्रतिबध्यतावच्छेदकत्वोपगमात्। पृथिवीव्याप्यवानितरभेदइत्याका
रकपरामर्शजन्यानुमितेश्चेतरभेदविशेष्यकपरामर्शजन्यत्वेन व्यभिचारानवकाशात्। नवैतादृशगुरुधर्मस्य साध्यप्रसिद्धि
५ प्रतिबध्यतावच्छेदकत्वे गौरवात्तदपेक्षया पृथिवीतरभेदवती त्वाद्याकारानुमितिनिरूपितप्रत्यक्षादिसाधारणेतरभेद
प्रकारताया विधेयतात्वकल्पनमेवोचितमिति वाच्यं। तथा सति धर्मितावच्छेदके भेदेनानुमितबाधबुद्धिप्रतिबध्यतावच्छेदककोटौ ५
प्रत्यक्षान्यत्वनिवेशे गौरवापेक्षया धर्मिविशेषणमित्तसाध्यप्रतिबंधकतायां तादृशधर्मस्य प्रतिबध्यतावच्छेदकको
टिनिवेशनौचित्यात्। एवमापत्तिस्थले आपाद्यत्वमपि विषयताविशेषः आपत्तिनिरूपितप्रकारतासामान्यस्य तत्र वह्निमान्
पर्वतो घटवान्स्यादित्याकारकापत्तावपि वह्न्यादेरापाद्यतापत्तेः। पर्वतो वह्निमानित्याकारकवह्न्याद्यनवच्छिन्नवि
शेष्यताशालिज्ञानीयविलक्षणावह्न्यादिप्रकारताया एवापाद्यत्वोपगमे वह्निमान्पर्वतो घटवान्स्यादित्याकारकापत्तौ वह्न्यादेरापाद्य
त्वापत्तेर्दुर्वारत्वात्। न च स्वव्यतिरिक्तनिर्णयजन्यतदापत्तिविषयत्वमेव स्वस्य तदापत्तिनिरूपितमापाद्यत्वम्। किमतिरिक्त
विषयतास्वीकारेणोक्तसमूहालंबनापत्तौ घटव्यतिरेकनिर्णयस्यैव हेतुतया वह्न्यादेस्तदापाद्यत्वासंभवात् इति चेन्न।
तादृशव्यतिरेकनिर्णयजन्यत्वानुपस्थितावपि वह्न्यादिनिष्ठापाद्यत्वावगाहिनो वह्निमापादयामीति साक्ष्यनुभव
सायस्यानुभवसिद्धतया आपाद्यत्वस्य स्वव्यतिरेकनिर्णयजन्यतदापत्तिविषयत्वरूपत्वासंभवात्। अथ वह्न्यादिप्रकारं
कापत्तिरेव तादृशानुव्यवसायविषयः। तादृशप्रकारतानिरूपितविषयतासंबंधेन तादृशानुव्यवसायं प्रति च व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तानभ्युपगमेवह्न्यादिव्याप्यवत्तानिर्णयादिजन्यतावच्छेदकंवह्न्यादिप्रकारकापत्ति २४

॥६॥ स्याभाववत्तानिर्णयजन्यतायाहेतुसाध्योपदर्शितसमूहालंबनाद्यनंतरेताद्दशानुव्यवसायप्रसंगः। अपत्तित्वंचमानसत्वंव्याप्योज्ञा
तिविशेषोवन्हिमापादयामीत्यनुव्यवसायसाक्षिक एव। न चातिरिक्तविषय[illegible]त्वमेववाच्यं। तथा चताद्दशसमूहालंबनापत्तौ
हेतुव्यभिचारइतिवाच्यं। अनुमितिस्थले यकार्यकारणभावद्वयस्य कारणीविशिष्टे निवेशेयेव्यभिचारस्य वारणीयत्वात्। भवेत्व
तिवन्हिसन्देहनिर्णयजन्यत्वस्याद्यापाद्यकापत्तौव्यभिचारवारणायतद्वैशिष्ट्यस्य [illegible] निवेशस्यानश्यवत्वात्। न च पर्वतत्वाव
च्छिन्नविशेष्यकवन्ह्यादिविशिष्टबुद्धौपर्वतत्वाद्यवच्छिन्नविशेष्यकत्वस्याभावादिमत्तानिर्णयाभावहेतुतायांपर्वतोवन्हिमा
नस्यादित्यापत्तौव्यभिचारवारणायपर्वतत्वाद्यवच्छिन्नविशेष्यक [illegible] आद्यापाद्यकापत्त्यन्यत्वंजन्यतावच्छेदककोटौनिवेश्य
मितितत्रजन्यतावच्छेदककोटौप्रविष्टतयाविशेषणसिद्धेः। वन्हिप्रकारकापत्त्यन्यत्वस्य तत्र निवेशे नैव न्हिमान्पर्वतः पर्वतोघट
वान्स्यादितिसमूहालंबननीताद्दशबाधद्दशायांआपत्तेरितिवाच्यं। जन्यतावच्छेदकसंबंधेनवह्न्याभाववत्तानिर्णयादन्य
त्वस्यैवतत्रनिवेशनीयतयाव्यभिचारापत्तौबीरणासंभवात्। तन्यत्वनिवेशनापेक्ष्य विषयता निवेशे लाघवात्। तस्मि
रितितुनवाच्यं। कार्यतावच्छेदकदिलाघवेनातिरिक्तविषयतासिद्धौतत्तैपादाद्व्यवत्त्वाज्ञानजन्यतावच्छेदके तया विषय दा
ताविशेषणोसिद्धिप्रसंगात्। वस्तुतस्तु। बाधाभावजन्यतावच्छेदककोटौजन्यतासंबंधेनबाधवदन्यत्वस्य निवेशेनमे
वोचितं। अन्यथाबाधकालीनेच्छाधीनज्ञानेव्यभिचारवारणायइच्छायाउत्तेजकत्वेगौरवात्। मन्मते आहार्यज्ञानस्यापि
बाधजन्यतयातस्यताद्दशकार्यतावच्छेदकस्मांक्रांतत्वेन व्यभिचारासंभवेतइच्छायाउत्तेजकत्वानभ्युपगमात्। न च बाधा ॥६॥

स्यबाध ५३

दिकालीनेच्छाधीनज्ञानेबाधहेतुतायाप्रामाणिकत्वयाएतदनुरोधेनतत्कल्पनेगौरवात् इच्छायाउत्तेजकत्वमावश्यकमितिवाच्यं।
आपत्तिस्थलेबाधबुद्धेर्हेतुतायाआवश्यकत्वात्। तत्रापि [illegible]त्वमनिवेश्य इच्छाकालीनज्ञानसाधारणताद्दशबाधाव्यवहितोत्तरक्ष
ना णस्यैव तज्जन्यतावच्छेदकत्वोपगमेतिरिक्तकारणतायाअकल्पनात्। न चैवमापत्त्यन्यज्ञानेकालेइच्छांविनापत्तिरितितत्रेच्छाहेतुत्वक
श्रिः ल्पनेगौरवमितिवाच्यं। इच्छायाउत्तेजकत्वेप्रामाण्यज्ञानादिसमनिच्छाभावस्यविशेषणत्वाविनिगमनाविरहेणानंतइच्छायाहेतु विशेषण
त्वकल्पनस्यैवोचितत्वादितिचेन्नैवं। आपाद्यत्वरूपविषयितानाविष्ट[illegible]नानभ्युपगमेज्ञाननिष्ठवन्ह्यादिप्रकारकापत्तित्वाभावासनि
यन्निष्ठ ष्ठताद्दशापत्तित्वाभावाद्वावन्हिंनापादयामीत्यनुव्यवसायोपि बाधः। ननुवन्ह्यादिव्यतिरेकत्वनिर्णयजन्यत्वविशिष्टापत्तित्वाद्यभावः। ताद
शजन्यत्वाद्यनुपस्थितिदशायामपिताद्दशप्रतीतेःसर्वानुभवसिद्धत्वात्। तथा च पूर्वोपदर्शितसमूहालंबनद्दशायांघटमापादयामीनव यां पा
न्हिमित्याद्यनुव्यवसायानुपपत्तिरितिताद्दशविषयतास्वीकारआवश्यक इति। एवं च ताद्दशविषयतानिरूपकत्वमेवापत्तित्वंतज्जातिविशे
षोमानाभावात्। आपत्त्यन्यज्ञानेताद्दशविलक्षणविषयत्वाभावादेवापादयामीत्याद्यनुव्यवसायविरहोपपत्तिरिति ध्येयं। अत्रेदम
वधेयं। विधेयत्वमेवापत्तौरची क्रियते। तथा चापत्तिनिरूपितविधेयत्वमेवापाद्यत्वं। पर्वतो वन्हिमान्पर्वतो घटवानित्याकारकाप
त्तौ च घटस्यैव विधेयत्वमुपगम्यते। ननु वन्हेरेतो न ताद्दशोपस्य नंतरं घटमापादयामि न तु वन्हि[illegible]मित्याद्याकारानुव्यवसायानुपप

८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षयता नगौरवं

विषयता॰

॥७॥ न्निः। विधेयतायाऽनुमित्यादिसाधारण्येपि तत्राप्तित्वाख्यजातिविशेषाभावान्न तदनंतरभापादयामीत्याद्यनुव्यवसायः। आपत्ति
त्वजातौमानाभावइति तु नवाच्यं। आपादयामीत्यनुव्यवसायस्यैवमानत्वात्। नचतादृशानुव्यवसायस्य विषयताविशेषविषय
कत्वेनाप्युपपत्तेर्जातिविशेषविषयकत्वे विवादइतिवाच्यं। विषयभेदेनानंतविषयताकल्पनापेक्षया तादृशजातिकल्पनस्यैव
व विवादभंजकत्वात्। नवसैन्मते बाधबुद्धिप्रतिबध्यतावच्छेदककोटौ तद्विधेयकविजातीयज्ञानत्वमित्रत्वनिवेशे तद्विधेयकान्य
त्वनिवेशेनुमित्याद्यसंग्रहापत्तेः। ममतु तन्निष्ठविलक्षणविधेयकान्यत्वमेवनिवेश्यतइतिवाच्यं। इच्छाधीनज्ञाने व्यभिचारवारण
यइच्छायाउत्तेजकत्वकल्पनापेक्षया लाघवेनेच्छान्यतासंबंधेनबाधवदन्यत्वस्यैवनिवेशितत्वात्। तेनैवोपन्नावपि व्यभिचारस्य वा
रणात्तदन्यत्वस्यैवानिवेशनात्। कार्यतावच्छेदकादिलाघवेनातिरिक्तविषयतासिद्धेः। प्रतिबंदिसहस्रकवलितत्वाच्च। एतेनानुमि
त्यादिसाधारणविलक्षणविषयतया आप्त्यादिसाधारण्येन तच्छलीयप्रतिबंधकतायां प्रतिबध्यतावच्छेदककोटौ प्रसक्तान्य
त्वापत्यन्यत्वं निवेशनीयमिति गौरवमित्यपि निरस्तमिति दिक्॥ वैपल्लुविनेनेति॥ ॥इति विषयताविचारः॥ ॥समाप्तः॥ ॥

पु॰ ५३

॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=26.10.20 10:37
,TRANSFERRED=2020/10/26 at 10:39:12
,PAGES=8
,TYPE=STD
,NAME=S0004530
,Book Name=M-817-VISHYATA VICHAR
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection